|| સીતારામ || ankurnagpal108@gmail.com.

સમસ્તનિર્ગતદોષાઃ પરબ્રહ્મ સનાતનઃ।
ડયનાઽઽનન્દકીનાથો વેદવેદ્યો મહામતિઃ।।

श्रीसीतारामो विजयतेतराम्

श्रीमद्भगवद्रामानन्दाचार्यकृतानन्दभाष्यभूषिता

केनोपनिषत्

मंगलाचरणं

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च। सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यांमा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु।

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

बदरीफलमपि दत्त्वा शबरी लेभे गतिं यतः परमाम्।
तमहं देवं वन्देऽनुपधिदयासागरं रामम् ॥ १ ॥
आराध्यं ब्रह्मरुद्रादेर्जगद्धेतुं च मुक्तिदम्।
दिव्यदेहं गुणाम्भोधिं रामं ब्रह्म समाश्रये ॥ २ ॥
सूत्रवृत्तिकृतौ नत्वा व्यासबोधायनौ मुनी।
श्रीमन्तं राघवानन्दाचार्यं गुरुं नमाम्यहम् ॥ ३ ॥

Scanned by CamScanner

कुर्वे गुरुं नमस्कृत्य ज्ञानभक्तिदयानिधिम्
केनोपनिषदश्चात्र भाष्यमानन्दसंज्ञकम् ॥ ४ ॥

सर्वस्यैव जनस्य मनःप्रभृतीनि करणानि अनीप्सितेऽपि वस्तुनि प्रवर्तमानानि ईप्सितेऽपि चाप्रवर्तमानानि भवन्ति सा चैषा प्रवृत्ति प्रवर्तक-पुरुषमन्तरेण न संभवति कुठारादिषु तथा दर्शनात्। अतः प्रवर्तकचेतन विशेषप्रश्नमुखेन ब्रह्मप्रश्नमुपक्षिपति कश्चिद् ब्रह्म जिज्ञासुः शिष्यः —

ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः। केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ १ ॥

मनः केन किंसंज्ञकेन प्रवर्तकविशेषेण प्रेषितं प्रेरितं सत् इषितम् इष्टम्। अत्र इडागमः छान्दसः। विषयं प्रति पतति गच्छति। इषितमित्य निष्टस्याप्युपलक्षणम्. अनिष्टेऽपि विषये मनसः प्रवृत्तिदर्शनात्। अचेतनत्वात् स्वयमस्य प्रवृत्तिर्न सम्भवति। जीव एव प्रेरक इत्यपि न युक्तम् अनिष्टेपि प्रवृत्तिदर्शनात् तस्मात् जीवकृतनिग्रहमवहेलयतोऽस्य कश्चिदपर एव प्रबलः प्रेरको भवेत् सः क इति प्रश्नाशयः। प्रथमः प्राणः पञ्चसु प्राणेषु मुख्यः हृदयस्थानः प्राणः केन देवेन युक्तः प्रवर्तितः सन् प्रैति प्रगच्छति स्वकार्यं प्रति, शरीरधारणरूपं स्वव्यापारं करोतीत्यर्थः 'यथाऽहमेवैतत् पञ्चधात्मानं विभज्यैतद् बाणमवष्टभ्य धारयामि' (प्र० २।३) इति श्रुत्या शरीरधारणरूपजीवनमेव मुख्यप्राणस्य प्रधानो-व्यापारः इत्यवगमात्। केन देवेन इषितां प्रवर्तिताम् इमां श्रूयमाणां लौकिकीं वैदिकीञ्च वाचं शब्दस्वरूपां वदन्ति जीवा इत्यध्याहार्यम्। यद्वा जीवाः प्रेरिता इति पदद्वयमध्याहार्यं केनप्रेरिता जीवाः इषिताम् इष्टाम् उपलक्षणम् अनिष्टाञ्च वाचं वदन्ति इति व्याख्येयम्। एतेन

जीवस्यापि तत्पारवश्यमुक्तं भवति । उ शब्दः सम्बोधनार्थः । अतः भो आचार्य ! कः किमभिधानः देवः द्योतमानः पुरुषविशेषः । चक्षुः श्रोत्रम् चक्षुश्च श्रोत्रं चक्षुःश्रोत्रम् प्राण्यङ्गत्वादेकवद्भावः । युनक्ति दर्शनश्रवणात्मके व्यापारे योजयति । चक्षुः श्रोत्रमिति घ्राणादीनामितरकरणानामप्युपलक्षणम् । अतः सर्वेषां करणानां जीवस्य च प्रेरयिता यः पुरुषविशेषो देवः तं वदेति भावः ॥ १ ॥

एवं पृष्ट आचार्यः प्रतिवदति—

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ २ ॥

यत् श्रोत्रस्य श्रोत्रम्, मनसो मनः वाचो वाचम् प्राणस्य प्राणः चक्षुषः चक्षुः ह त्वया पृष्टः प्रवर्तको देवः स उ इत्यन्वयः । यत् यः श्रोत्रस्यश्रोतुः जीवस्य शब्दसाक्षात्कारे उपकारकमिन्द्रियं श्रोत्रं तस्य श्रोत्रम् शब्दभासकत्वशक्तिदाता परमपुरुषाहितशक्तिकोस्यैव श्रोत्रेन्द्रियस्य शब्दभासने समर्थत्वात् अतः सः श्रोत्रस्य श्रोत्रमित्युच्यते । मनसः सुखदुःखाद्यान्तरवस्तूपलम्भे साधनभूतमिन्द्रियं मनः तस्यापि मनः मननोपयोगिशक्तिदाता, न हि परमात्मना अनाहितशक्तिकं मनः जीवस्य सुखादिसाक्षात्कारे साधनभावं भजेत् । अतः मनसो मन इत्युच्यते परमपुरुषः । वाचो वाचम् जीवस्य शब्दप्रयोगात्मकव्यापारे साधनमिन्द्रियं वाक् तस्य वागिन्द्रियस्य वाचम् । वाक् छान्दसप्रथमार्थे द्वितीया । शब्दोच्चारणशक्तिप्रदः, परमपुरुषप्राप्तशक्तिमदेव वागिन्द्रियं जीवस्य शब्दप्रयोगे साधनं भवति । अतः वाचो वाक् इत्युक्तः । प्राणस्य प्राणः शरीरधारणरूपव्यापारवान् शरीरान्तःसञ्चारी वायुः प्राणः तस्य प्राणः जीवन-

शक्तिप्रदः, परमपुरुषाहितजीवनशक्तिक एव जीवनं करोति तस्मात् प्राणस्य प्राण इति कथ्यते । चक्षुषः चक्षुः रूपादिसाक्षात्कारे जीवस्य उपकारकमिन्द्रियं चक्षुः तस्यापि चक्षुषः परमात्मा दर्शनप्रदत्वात् परमात्मलब्धशक्तिकस्यैव चक्षुः रूपादिसाक्षात्कारे साधनत्वात् । अतः श्रोत्रादीनां तत्तच्छक्तिप्रदो यो देवः प्रसिद्धः स एव मनआदीनां प्रेरयितृत्वेन त्वया पृष्टो देव इति बुध्यस्व । "यो मनोऽन्तरोयमयति" "वाचमन्तरोयमयति" श्रोत्रमन्तरोयमयति" "चक्षुरन्तरोयमयति" प्राणमन्तरोयमयति" इत्याद्याभिः श्रुतिभिरपि परमपुरुषस्य सर्वेश्वरस्य मनः प्रभृतिनियामकत्वं सिध्यति । श्रोत्रादीनां प्रवर्तकः सर्वेश्वर एवेत्येवं भूतस्य ज्ञानस्य फलं प्रदर्शयति आचार्यः अतिमुच्य धीरा इति, धीराः परमपुरुष एव मनःप्रभृतिप्रवर्तकः इति ज्ञानवन्ता जना अस्मात् दृश्यमानात् लोकात् देहात् प्रेत्य निष्क्रम्य मूर्धन्यया शताधिकया नाड्या निर्गत्य अर्चिरादिमार्गेण गत्वा अतिमुच्य लिङ्गशरीरं परित्यज्य अमृताः मुक्ताः भवन्ति । यद्वा अतिमुच्य परमात्मनः सर्वान्तर्यामित्वज्ञानेन स्वातन्त्र्यभ्रमं परित्यज्य परमेश्वर एव सर्वं कारयतीति चिन्तयन्तः अस्मात् लोकात् मृत्युलोकात् प्रेत्य अर्चिरादिपथा देशविशेषं भगवद्धामरूपं गत्वा अमृता भवन्ति, मुक्ताः भवन्तीत्यर्थः । एतेन मुक्तानां नान्यत्रलोके गमनं भवति, किन्तु ब्रह्मभाव एव भवतीति मतं व्युदस्तं भवति मुक्तिस्थानस्य । भगवद्धामरूपलोकान्तरस्य प्रतीयमानत्वात् ॥२॥

मनःप्रभृतीनां कः प्रेरक इति प्रश्नस्योत्तरं श्रोत्रस्य श्रोत्रमित्यादिना दत्तमपि न सन्तोषमावहति स्पष्टतया तत्स्वरूपस्यानुपदेशात् । अतः सुस्पष्टं तत्स्वरूपमुपदिशेति शिष्याकाङ्क्षायामाह—

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादथो

Scanned by CamScanner

अविदितादधि । इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ ३ ॥

तत्र मनःप्राणादीनां प्रेरके परमपुरुषे चक्षुः न गच्छति न स्वव्यापारं करोति, चक्षुःपदं प्रत्यक्षप्रमाणमात्रोपलक्षणम्, प्रत्यक्ष प्रमाणं तत्र नोपतिष्ठत इत्यर्थः 'अतीन्द्रियो हि सर्वेश्वरः, अतः प्रत्यक्षप्रमाणागोचर इति भावः । न वाग् गच्छति, वाक्पदेन वागिन्द्रियोच्चार्यशब्दप्रमाण लक्ष्यते तादृशः शब्दोऽपि सर्वेश्वरं बोधयितुमसमर्थः प्रत्यक्षोपजीविनः शब्दप्रमाणस्य अतीन्द्रिये वस्तुनि प्रसरासम्भवात् इत्यर्थः । नो मनः अत्र मनः शब्देन मनोव्यापारप्रधानमनुमानं प्रमाणं लक्ष्यते तदनुमानमपि प्रत्यक्षमुपजीवति । अतः प्रत्यक्षातीते वस्तुनि अनुमानस्यापि नास्त्यवसरः । न मनः तत्र गच्छतीत्यन्वयः । नन्वेतावताऽपि सुस्पष्टमुपदिष्टो भवति सर्वेश्वरइत्यत्र आह न विद्मो न विजानीमो यथैतदनुशिष्यात् इदं दृश्यमान वस्तु घटपटादिकं यथा येन प्रकारेण कम्बुग्रीवादिमत्त्वादिना अनुशिष्यात् उपदिश्येत् तादृश प्रकारं कमपि परमपुरुषे न विद्मः, घटादिवत् केनापि-प्रकारेण सुस्पष्टोपदेशानर्ह एव परमात्माऽतो वस्तुस्वभाव एवदृशः नात्र उपदेशकस्य दोष इत्यवबुध्य सन्तोषमाधेहि । ननु विचित्रेऽत्र जगति किमपि तादृश वस्तु भवेत् यत् उदाहृत्य विशेषतः उपदिशतु भवान् सर्वेश्वर–स्वरूपवमित्यत्राह– न विजानीमः । लौकिकेषु वस्तुषु लौकिका एव प्रकाराः भवन्ति नहि तेषु एकोपि प्रकारः परमात्मनि येन प्रकारेण त विशेषेण जानीयाम । अतः विशेषेण न जानीमो वयमिति कथं विशेषेण उपदिशाम । साकल्येन तस्योपदेशः साकल्येन बोधो न सम्भवति । अतः एतावतैव सन्तोष्टव्यमिति गुरोरभिप्रायः । ननु लौकिकार्थवत्स्पष्टमुपदेश्यत्व नास्ति यदि तर्हि कीदृशं तत्स्वरूपमित्यत्राह–अन्यदेव तद्विदितात् तत्परमात्मस्वरूपं विदितात् ज्ञानगोचरवस्तुनः अन्यदेव भिन्नमेव कार्त्स्न्येन विदितवस्तुकोटौ नास्य अन्तर्भाव इति भावः । ननु एवमविदितत्वे

खपुष्पादिवत्स्यात् परमपुरुष इत्यत्राह—(अथोऽविदितादधि) अविदितात् खपुष्पादितः अधि अन्यदेव परमात्मस्वरूपम् । कात्स्न्र्येन अविदितोऽपि सर्वेश्वरः न खपुष्पादिवत् सर्वथा अविदितः उपनिषत्प्रमाण-वेद्यत्वात् खपुष्पादिकं केनापि प्रमाणेन न वेद्यते इति भेद इति भावः । इति एवं प्रकार वचन शुश्रुम श्रुतवन्तो वयम् । कुतः इत्याकांक्षयामाह (पूर्वेषाम्) पूर्वेभ्यः आचार्येभ्यः इत्यर्थः । इह पञ्चम्यर्थे षष्ठी । केभ्यः पूर्वेभ्य इत्य-त्राह । ये पूर्वाचार्याः नः अस्माकं कृते तत् परमपुरुषस्वरूपं व्याच-चक्षिरे विविच्य उपदिष्टवन्तः तेभ्यः श्रुतवन्तो वयमित्यर्थः । पूर्वकालीना आचार्याः सम्यक् भगवत्स्वरूपमालोच्य अस्मान्प्रति ईदृशमेव वचनमुक्त-वन्तः, यत् परमात्मस्वरूपं साकल्येन उपदेशयोग्यं साकल्येन ज्ञानयोग्यं वा नास्त्येव । अतः विदितेभ्यः अविदितेभ्यश्च भिन्नं वेदशिरस्समुदायसमुप-पादितमेव वेद्यं भवतीति भावः । यद्वा अविदितशब्देन अचिदंशः उच्यते, विदितशब्देन तु चिदंशः ताभ्यां चिदचिद्भ्यामन्यः एव सर्वेश्वर तदन्तर्यामीति व्याख्येयम् ।। ३ ।।

मनःप्रभृतिप्रेरकं परं ब्रह्म श्रुतिभिरपि साकल्येन समुपदेष्टुं शक्यतेऽतः साकल्येन समुपदेशाय नाग्रहः सेवनीय इति भावेन गुरुरुपदिशति—

यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।। ४ ।।

यत् मनः प्राणादिप्रवर्तकं परं ब्रह्म वाचा अनादिनिधनया वेदवाण्या अनभ्युदितं साकल्येन न प्रकाशितम् । कस्तत्र प्रसरः इतरवाण्या इति भावः । येन च परब्रह्मणा प्रवर्तिता सत्येव वाक् अभ्युद्यते समुच्चार्यते पुरुषैरिति शेषः । तदेव ब्रह्म मनः प्रभृतिप्रेरकमिति त्वं ब्रह्मजिज्ञासुः शिष्यः विद्धि जानीहि । यदिदं दृश्यमानं जगत् चिदचित्स्वरूपम् उपासते कामा-

Scanned by CamScanner

कुलितमनस जीवा इति शेषः । तदिदं दृश्यमानं चिदचित्स्वरूपं जगत् तु न ब्रह्म इति बु ध्यस्वेतिभावः ॥ ४ ॥

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ५ ॥

यत् मनःप्रभृतिप्रेरकं ब्रह्म मनसा मनोरूपेणेन्द्रियेण न मनुते कश्चिज्जीव इति शेषः । इदं ब्रह्म इत्थमिति साकल्येन मोनोद्वाराऽपि कश्चित् न वेत्तुमर्हतीति भावः । येन परमब्रह्मणा मनः अन्तःकरणरूपम् मनः प्रकाशितं भवति, यद्वा येन ब्रह्मणा मनः प्रेरितं सत् मतं स्वव्यापारयुक्तं भवति इति आहुः प्राचीना आचार्या इति शेषः । तदेव मनः प्रभृतिप्रेरक ब्रह्मेति त्वं विद्धि । नेदमित्यादीनां पूर्ववदेवार्थः ॥ ५ ॥

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ६ ॥

यत् परब्रह्मस्वरूपं चक्षुषा चक्षुरिन्द्रियेण न पश्यति न जानाति कश्चित् जीव इति शेषः । येन सर्वेश्वरेण प्रेरितानि चक्षूंषि चक्षुरिन्द्रियाणि पश्यति, छान्दसत्वात् वचनव्यत्यासः पश्यन्ति स्वविषयप्रकाशकानि भवन्ति इत्यर्थः, यद्वा पश्यन्ति दृश्यन्ते इत्यर्थः, परमात्मना दृश्यन्ते चक्षूंषि अतीन्द्रियत्वं तु तेषामस्मदाद्यपेक्षया न परमात्मापेक्षयेति भावः । अत्र पक्षे पश्यतीत्यत्र वचनव्यत्यासः कर्मार्थे कर्तृप्रत्ययश्च छान्दसत्वादेवावगन्तव्यः तदेवेत्यादेरुत्तरार्धस्य पूर्ववदेवार्थोऽनुसन्धातव्यः ॥ ६ ॥

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ७ ॥

Scanned by CamScanner

यत् सर्वेश्वरस्वरूपं श्रोत्रेण इन्द्रियेण न शृणोति कश्चित् श्रावण-प्रत्यक्षविषयं न कुरुते तत्स्वरूपस्य श्रोत्रेन्द्रियाऽविषयत्वात् । येन पर-ब्रह्मणा प्रेरितं सत् श्रोत्रमिन्द्रियं श्रुतं श्रावणप्रत्यक्षविषयीकृतम् भवति । यद्वा श्रुतं स्वविषयकप्रत्यक्षजननरूपस्वव्यापारसमर्थं भवति इत्यर्थः । उत्तरार्धन्तु प्राग्वदेव व्याख्येयम् ॥ ७ ॥

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ ८ ॥

इति केनोपनिषदि प्रथमः खण्डः ॥ १ ॥

यत् मनः प्राणादिप्रेरकपरमात्मतत्वं प्राणेन प्राणाख्येन करणेन न प्राणिति न चेष्टते जीवनापरपर्यायप्राणनव्यापारवत् न भवतीति यावत् । येन परब्रह्मणा प्राणः शरीरधारण कर्तृतया प्रसिद्धः प्राणः प्रणीयते प्रेर्यते यत्प्रेरितः सन् शरीधारणात्म स्वव्या-पारवान् भवतीत्यर्थः । तदेव ब्रह्मेत्यादेः प्राग्वदर्थः ॥ ८ ॥

इति केनोपनिषदि आनन्दभाष्ये प्रथमः खण्डः ॥ १ ॥

સમરીતિર્નદીતેજા: પરકૃપ સનાતન:।
જયતાડડાનન્દબોધાખ્યો વેદવેદ્યો મહામતિ:॥

Ankur Nagpal

अथ द्वितीयः खण्डः

यत् साकल्येन सर्वेश्वरस्य ज्ञानागोचरत्वं "नेदं यदिदमुपासते" इत्यादि वाक्यप्रतिपादितम् तदेव द्रढीकर्तुं गुरुरुपदिशति--

यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्व यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ॥ १ ॥

हे शिष्य सुवेद सम्यग्जानामि ब्रह्मणो रूप अहमिति शेषः इति यदि मन्यसे अभिमानं कुरुषे तदा त्वं नूनं निश्चितम्, दहरमेव अल्पमेव ब्रह्मणो रूपं वेत्थ जानासि, ब्रह्मणः स्वरूपस्य अनन्तत्वेन सम्यग् ज्ञानानर्हत्वात् । त्वम् इत्यत्र सप्तम्यर्थे प्रथमा छान्दसत्वात्, अतः त्वयि शिष्ये यत् ब्रह्मणो रूपम् अन्तर्यमनकर्तृ । अथशब्दः अप्यर्थकः देवेष्वथ देवेष्वपि अस्य ब्रह्मणः यद्रूपम् ते त्वया विदितम् ज्ञातम् तत्तु मीमांस्यमेव नु विचारणीयमेव सांप्रतम् अनन्तस्वरूपस्य ब्रह्मणः इदानीमपि त्वया कात्स्न्येंन, अज्ञातत्वात्. कात्स्न्र्येन ज्ञानानर्हस्वभावं हि परं ब्रह्म । अतः यद् ज्ञातं तदल्पमेव ज्ञातं मीमांसनीयता तिष्ठत्येव ब्रह्मणि त्वयापीति भावः ॥ १ ॥

ननु ममाज्ञस्य शिष्यस्य साकल्येन ब्रह्मस्वरूपाज्ञानाभावेऽपि गुरुवर्यस्य भवतस्तु सम्यग् ज्ञानित्व स्यादेव सम्यग् ज्ञानित्वेन विश्रुतो हि भवान् इत्याकांक्षायामाह गुरुः--

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ २ ॥

Scanned by CamScanner

सुवेद सम्यग् जानाति ब्रह्मस्वरूपमयमाचार्य इति लोका: वदन्ति अतोहं तथा विश्रुतः अहमाचार्यस्तु सुवेदेति सम्यग् जानामीति न मन्ये सम्यग् ज्ञानित्वाभिमान न करोमि । तर्हि भवानपि सर्वथा न वेत्ति किम् इत्यत्राह नो न वेदेति न वेद न जानामि इति न किन्तु वेद जानाम्येव, अनन्तत्वात् साकल्यन न जानामि तथापि गुरूपदिष्टरूपेण तु जानाम्येवेति भावः । न यः तद्वेद स नो तद्वेदेति योजना । इति, वदति च पदद्वयमध्याहार्यं योजनीयम् । तथा च नः ब्रह्मज्ञानित्वेन विश्रुतानामस्माकं मध्ये यः कोऽपि आचार्यः तत् ब्रह्मस्वरूपं वेद कात्स्न्येनाहं जानामि इति वदति सः तादृग् ज्ञानाभिमानी नो नैव तद् ब्रह्मस्वरूपं वेद जानातीत्यर्थः । ब्रह्मस्वरूपस्य साकल्येन ज्ञानाभिमानी अस्मादृश विश्रुतोऽपि नैव सम्यग् जानामीति भावः । यश्च न वेदेति वदति स वेद इति योजना । तथा च—यः न वेद ब्रह्मस्वरूप साकल्येन न जानाम्यहमिति वदति स वेद जानाति सम्यक् । ब्रह्मस्वरूपस्य साकल्येना ज्ञेयस्वभावतया अहं साकल्येन न जानामीति ज्ञानवानेव सम्यग्ज्ञानवान् ब्रह्मणः अपरिच्छिन्नत्वस्य तेन ज्ञातत्वात् । अहं सम्यग् जानामीति ज्ञानवांस्तु परिच्छिन्नत्वमेव ब्रह्मणो ज्ञातवानतः स न सम्यग् ज्ञानीति भावः इयमेव ब्रह्मणः गुणानामविज्ञाने । यः साकल्येन ब्रह्मगुणान् जानामीति मन्यते स न सम्यग् ज्ञानी तद्गुणानामनन्तत्वेन साकल्येन ज्ञातुमनर्हत्वात् । ब्रह्मगुणान् साकल्येन न जानामीति मन्यते स एव तद्गुणविज्ञानी अपरिच्छिन्नत्वेन तद् तद्गुणज्ञानात् इति बोध्यम् ।। २ ।।

एव द्वितीयमन्त्रस्योत्तरार्धेन यो नस्तद्वेत्यादिना ब्रह्मस्वरूपस्य साकल्येन श्रवणरूपज्ञानागोचरत्वमुपपादितम् । संप्रति मननिदिध्यासनगोचरत्वमपि साकल्येन तस्य नास्तीति वदति--

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ।। ३ ।।

Scanned by CamScanner

यस्य जनस्य ब्रह्म मया अमतम् साकल्येन न मननविषयीकृतम् इति बुद्धिरस्ति तस्य ज्ञानिनः कृते ब्रह्म मतम् मननविषयीकृतमेव विचारितमेवेति यावत् ब्रह्मणोऽनन्तत्वस्य तेनावधारणात्। यस्य तु ब्रह्म मया मतम् साकल्येन मननगोचरीकृतम् विचारितमिति यावत् इति बुद्धिरस्ति स जनः न वेद न ब्रह्मविषयकमननवान् ब्रह्मणोऽपरिच्छिन्नत्वस्य तेनाज्ञातत्वात् तथा विजानतां ब्रह्म मया सम्यक् निदिध्यस्तम् साक्षात्कृतमिति यावत् इति विशेषेण ज्ञानाभिमानिनाम् कृते अविज्ञातम् ब्रह्म न सम्यक् साक्षात्कृतमित्यर्थः। ब्रह्मणोऽपरिच्छिन्नत्वेन सम्यक् साक्षात्कारानर्हत्वात्। अविजानताम्=ब्रह्म मया न सम्यक्साक्षात्कृतम् इत्येवं ज्ञानवतां कृते तु ब्रह्म विज्ञातमेव सम्यक् साक्षात्कृतमेव ब्रह्मणोऽपरिच्छिन्नत्वस्य तैः परिज्ञातत्वात् एवं ब्रह्मगुणानामपि साकल्येन मनननिदिध्यासनागोचरत्वमाकलनीयम् तेषामप्यनन्तत्वात् ॥ ३ ॥

ननु ब्रह्मस्वरूपं यदि साकल्येन विदितं न स्यात् तदा मोक्ष एव न सिध्येत् इति शंकमानं शिष्यं प्रति वदति गुरुः--

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥ ४ ॥

अत्र मंत्रे श्रुतमितिशब्दोध्याहार्यः मनननिदिध्यासनबोधकशब्दसामर्थ्यात् ततः येन पुंसाविधिवदभिगतगुरुमुखात् ब्रह्म श्रुतम् सत्यत्वज्ञानत्वानन्तत्वादिभिः ब्रह्मेतराऽसाधारणैः धर्मैः ब्रह्मविषयकश्रावणज्ञानं कृतम् तदनन्तरं मतम् उपपत्तियोजनया गुरुसब्रह्मचारिसम्वादेन शंकादिव्यावृत्त्यर्थं मननात्मकं ज्ञानविषयीकृतम् तदनन्तरं प्रतिबोधविदितम् प्रतिबोधः निदिध्यासनम् उपासना वा तेन विदितम् साक्षात्कृतं ब्रह्म स पुमान् हि निश्चयेन अमृतत्वं मोक्षं विन्दते प्राप्नोति। साकल्येनाज्ञानेऽपि श्रवणमनननिदिध्यासनेन ब्रह्मणः योग्यैकदेशसाक्षात्कारेऽपि मोक्षलाभो

भवति, अतो हे शिष्य न त्वयोद्विग्नेन भाव्यमिति गुरोराशयः। आत्मना धृत्या वीर्यं मनोऽवधानरूपं विद्यानिष्पत्तिजनकं बलं विन्दते लभते तेन च निष्पन्नया विद्यया उपासनारूपया भक्त्या अमृतं परमात्मस्वरूपं विन्दते पश्यति साक्षात्करोतीत्यर्थः। धृत्या मनः समाधाय विद्यानिष्पत्तिद्वारा ब्रह्मसाक्षात्कारो भवति। ततश्च मोक्षसिद्धिर्भवतीति क्रमोऽत्र शिष्यमनःसमाधानाय प्रदर्शितः कृपालुनाचार्येण। यद्वा बुध्यते इति बोधः वेद्यं वस्तु बोधे बोधे इति प्रतिबोधम्, प्रतिबोधं विदितमिति प्रतिबोधविदितम्। यद् यद् वेद्यं वस्तु तत्र तत्र अन्तर्यामितया वर्तमानं ब्रह्मास्तीति येन विदितं तेन ब्रह्म सम्यगवधारितम् स पुमान् अमृतत्वं विन्दते मोक्षं लभते इत्यर्थः कार्यः। अग्रिममन्त्रोत्तरार्धेनोपोद्बलितश्चायमर्थं इति बोध्यम्॥ ४॥

नन्वेवमुक्ता परमात्मस्वरूपसाक्षात्कारिणी विद्या कदा सम्पादनीयेत्यत्र गुरुराह—

इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन् महती विनष्टिः। भूतेषु भूतेषु विचित्य धीराः प्रत्यास्माल्लोकादमृता भवन्ति॥ ५॥

इति केनोपनिद द्वितोयः खण्डः।

इह जन्मनि शास्त्राधिकारवति ब्राह्मणादिशरीरे सति यदि अवेदीत् ज्ञातवान् ब्रह्मेतिशेषः चेत् अथ तदा सत्यमविश्वरं ब्रह्म विद्याफलस्वरूपमस्ति वर्तते ब्रह्म प्राप्तिर्निश्चितेति भावः। इह ब्राह्मणादिजन्मनि न अवेदीत् ब्रह्मज्ञानवान् नाभूत्चेत् तदा महती विनष्टिः महाननर्थः संसाराकूपारचंक्रमणस्वरूपः भवेत्। अतः ब्राह्मणादिशरीरे विद्याप्राप्तियोग्ये प्राप्ते सति सद्य एव ब्रह्मविज्ञानाय यतनीयम्, विलम्बो

न कार्यं इति भावः। पूर्वमंत्रोक्तप्रतिबोधशब्दार्थं दर्शयति। भूतेषुभूतेषु सर्वभूतेषु प्रतिबोधस्यार्थः स्थितं ब्रह्म विचिन्त्य तेभ्यो विलक्षणत्वेनावधाय आमरणं स्मारं स्मारं धीराः बुद्धिमन्तः बुद्धिस्तु अत्र वेदने ब्रह्मप्राप्ति. अवदने महानर्थः इति विवेकरूपा तेन ईदृश विवेकवन्तः जना अस्मात् लोकात् शरीरात् प्रेत्य शताधिकया मूर्धन्यनाड्यानिर्गत्य अमृता मुक्ता भवन्ति देशविशेषविशिष्टं परम पुरुषं प्राप्ता भवन्तीति यावत् ॥ ५ ॥

इति केनोपनिषदानन्दभाष्ये द्वितीयः खण्डः ॥ २ ॥

❀०❀

अथ तृतीयः खण्डः

न केवलं मनः प्राणप्रभृतीनां परमात्मप्रेरितानामेव स्वस्वकार्यकरणसामर्थ्यमपितु देवादीनां सामर्थ्यवत्तया प्रसिद्धानां चेतनानामपि परमेश्वराहितशक्तीनामेव स्वस्वकार्यविशेषकर्तृत्वं नान्यथेति आख्यायिकामुखेन प्रदर्शयति गुरुः––

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥ १ ॥

ब्रह्म सकलचिदचिदन्तर्यमनकर्तृ परमपुरुष इति यावत्। पुरा देवासुरसंग्रामे देवेभ्यः देवानां कृते देवेष्वाविश्य तत्करणबलाधानेन विजिग्ये असुरान् विजितवत्। ह शब्दो निश्चये, एतन्निश्चितमित्यर्थः। अथ

विजयानन्तरम् तस्य देवेष्वाविष्टस्य ब्रह्मणः विजये ब्रह्मकर्तृके असुरविजये सत्यपि तदजानन्तो देवा अमहीयन्त स्वमहत्वममन्यन्त । अहंकारवन्तोऽभवन्निति भावः । ह शब्दोऽत्राश्चर्ये ब्रह्मनिमित्तकविजयेऽपि एतेऽहंकारिण इति आश्चर्यमेतदिति भावः । ते देवा अहंकारवशात् ऐक्षन्त ईक्षणं कृतवन्तः । ईक्षणप्रकारमेवाह-अयं प्रत्यक्षविषयो विजयः असुरपराभवलक्षणः अस्माकमिन्द्रादीनामेव नत्वन्यस्य कस्यचित्. अयं महिमा सर्वजन्तुकृतस्तुति पूजादिरूपं महत्वमस्माकमेव इन्द्रादीनां नापरस्येति व्यजानन ।। १ ।।

तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानन्त किमिदं यक्षमिति ।। २ ।।

ब्रह्म सर्वज्ञः परमपुरुषः एषां देवानां स्वनिमित्तकविजयाभिमानवताम् तत् अहंकारपूर्वमीक्षणम् अस्माकमेवायं विजय इत्यादिरूपं विजज्ञौ अजानात् । अनन्तरं ब्रह्म देवेभ्यः देवानां कृते देवान् स्वात्मबोधदानेनानुग्रहीतुम प्रादुर्बभूव यक्षस्वरूपेण प्रकटमभूत् । हेति निश्चये । तद् यक्षस्वरूपेण आविर्भूतं ब्रह्म किमिदं यक्षमिति देवा न व्यजान् न ज्ञातवन्तः । अभिमानादिदोषदूषितान्तःकरणतया देवा यक्षरूपेणाविर्भूतमपि ब्रह्म ब्रह्मत्वेन निश्चेतुं नाशन्कुवन्निति भावः ।। २ ।।

तेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतद्यक्षमिति तथेति ।। ३ ।।

एवं यक्षरूपं ब्रह्माजानन्तो देवा अग्निम् अग्रगमनकर्तारं सर्वतस्तेजस्विनं देवमग्निनामानमब्रुवन् उक्तवन्तः । हे जातवेदः अग्ने एतत् अस्माभिः सर्वैः दृश्यमानं विजानीहि विशेषतोऽवगच्छ इदं पुरःस्थित यक्षम् किम् देवादिषु कतमदिति । देवादिषु मध्ये एतद् दृश्यमानं यक्षात्मकं किमिति विशेषरूपेण निश्चिनु । एवं देवैरुक्तोऽग्निरुवाच तथेति यद्भवद्भिरादिश्यते तत् करिष्यामीति स्वीकृतवानित्यर्थः ।। ३ ।।

Scanned by CamScanner

तदभ्यद्रवत्तमभ्यवदत् कोऽसीत्यग्निर्वा अहमस्मी-
त्यब्रवीज्जातवेदा वा अहमस्मीति ॥ ४ ॥

स्वीकृतदेववचनोऽग्निः तद् यक्षस्वरूपेणावास्थितं ब्रह्म अभि आभिमुख्येन अद्रवत् ब्रह्मसमीपं गतवान् । द्रु गतौ धातुः । अभिमुखमागतं जिज्ञासावन्तं वह्निदेवं तद् ब्रह्म अभ्यवदत् पप्रच्छ कोऽसि मत्समीपमागत-स्त्वं को भवसि इत्यर्थः । एवं पृष्टः अग्निरब्रीत् उक्तवान् अग्निः अग्निनामा वै प्रसिद्धोहं सर्वेषामस्मि, जातवेदाः जातवेदो नाम्ना वै प्रसिद्धोहमस्मि सर्वेषामित्युक्तवानित्यर्थः ॥ ४ ॥

एवमुक्तवन्तं वह्निं ब्रह्म पुनः पृच्छति--

तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वं दहेयम् ।
यदिदं पृथिव्यामिति ॥ ५ ॥

तस्मिन् अग्निजातवेद इति नामद्वयेन प्रसिद्धे त्वयि किं वीर्यं सामर्थ्यमस्तीति ब्रह्म प्रपच्छ, तथा पृष्टोग्निः यदिदं दृश्यमानं पृथिव्यां वस्तु जातं सर्वं दहेयम् भस्मीकुर्यामिति अवदत् । अत्र पृथिवीपद लोकान्तरस्याप्युपलक्षणम्, तेन ब्रह्मांडान्तर्वर्ति मूर्तं सर्वं स्थावरजङ्गमात्मक वस्तु दग्धुं मे सामर्थ्यमस्तीति गर्वात्मकमुत्तरं दत्तवानिति भावः ॥ ५ ॥

तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृत्ते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ ६ ॥

एवं सर्वदहनसामर्थ्यं प्रख्यातवतेऽग्नये तद् यक्षरूपं ब्रह्म तृणं निदधौ किमपि शुष्कमेकं तृणं तृणस्वरूपमत्यल्प दाह्य वस्तु तस्य पुरतः

Scanned by CamScanner

प्राभिमान । ततश्चाग्निं जगाद, एतत् तृणं दह भस्मीकुरु इति, एवं यक्षेणोक्तोऽग्निः तत्पुरः स्थितं तृणं उपप्रेयाय उप समीप प्रकर्षेण गतवान् गत्वा च सर्वजवेन स्वीय सर्वप्रकारेणवेगेन पुरःस्थित तृणं दग्धुं यापृतोऽपि न शशाक भस्मीकर्तुं न प्राभवत् । स तृण दग्धुमसमर्थोभवन वह्निःततः तस्मात् तृणादहनादेवहेतोः अस्मदपेक्षयाऽपि बलीयः किमप्येतत् यक्षरूपमित्यवधार्य गताभिमानः शीघ्रमेव निववृतेतस्मात् यक्षसमीपदेशात् निवृत्तवान, देवसमीपं गत्वा च देवानुवाच एतत् यक्षं किमिति विज्ञातुं विशेषेण निश्चेतुमहं नाशकम् न समर्थोऽभवमिति ॥ ६ ॥

अथ वायुमब्रुवन् वायवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ ७ ॥

अथ यक्ष पार्श्वात् निवृत्तस्याग्नेर्वचःश्रवणानन्तरं देवा वायुमब्रुवन् उक्तवन्तः—हे वायो एतद्विजानीहि बुध्यस्व एतद् यक्षं किमिति । एवं देवैरुक्तो वायुरुवाच तथेति भवद्भिर्देवैर्यदुक्तं तत्करिष्यामीति प्रत्युक्तवानित्यर्थः ॥ ७ ॥

तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥ ८ ॥

स वायुः तद् यक्षमभ्यद्रवत् यक्षसमीपं गतवान् तं समीपमागतं वायुं यक्षरूपं ब्रह्म अभ्यवदत् साम्मुख्येन पप्रच्छ, कोऽसीति, एवं पृष्टोवायुरुक्तवान वायुर्वा अहमस्मीति, नामतो वायुरहं सामान्येन प्रसिद्धोस्मि । वै प्रसिद्धो मातरिश्वा वा अहमस्मीति, मातरि आकाशे श्वसिति गच्छतीति मातरिश्वा विशेषेण आकाशादिप्रदेशाधिकरणगतिशीलत्वात् मातरिश्वेतिनाम्नाप्रसिद्धोऽहमस्मीति ॥ ८ ॥

तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वमाददीय यदिदं पृथिव्यामिति ॥ ९ ॥

वायुना एवमुक्तं यक्षरूपं ब्रह्म पुनरपृच्छत् वायुम् । एवं नामद्वयेन विख्यापितस्वप्रभावे त्वयि किम् कीदृशं वीर्यं सामर्थ्यमस्ति, किं किं कार्यं कर्तुं त्वं समर्थोऽसीति भावः । एवं पृष्टो वायुरुक्तवान्–पृथिव्याम् इदं दृश्यमानं यत् किञ्चित् स्थावरजङ्गमात्मकं वस्तु तत्सर्वमाददीय आदायान्तरिक्षे गमनं कुर्याम् सर्वमुड्डाययितुं समर्थोऽहमस्मीति स्वसामर्थ्यं प्रकटितवान् ॥ ९ ॥

तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ १० ॥

तस्मै एवं सर्वादानसामर्थ्यं प्रकटितवते वायवे तदनुग्रहार्थं तृणं तत्पुरतः निदधौ स्थापितं कृतवत् । स्थापयित्वा चोवाच-एतत् पुरो निहितं तृणं आदत्स्व एतस्मात् स्थानात् विचालय, एवमुक्तो वायुः तत्तृणं सर्वजवेन सर्वेण स्वगतेन वेगेन उपप्रेयाय प्रकर्षेण समीपं गतवान् तृणं चालयितुं प्रायतत परन्तु तत्पुरःस्थित तृणमादातुं विचालयितुं न शशाक न समर्थोऽभूत् । सः वायुः ततः तृणानादानादेव गतगर्वः द्रुतं यक्षसमीपात् निववृते देवसमीपमागतवान् । आगत्य च देवानुवाच-यदतेत् पुरोगतं यक्षं तत्किमिति विशेषतो ज्ञातं नाहं समर्थोऽभूवम् इति ॥ १० ॥

अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥ ११ ॥

Scanned by CamScanner

अथ विगतगर्वस्य यक्षदेशात् परावृत्तस्य वायोर्यक्षाविज्ञानावबोधक-वचनश्रवणानन्तरं देवा इन्द्रं देवराजमब्रुवन् उक्तवन्तः। हे मघवन् इन्द्र एतद् विजानीहि किमेतद् यक्षमिति। पूर्ववद् व्याख्या कार्या। देवैर्निवेदितो देवेन्द्रः तथेति-भवदुक्तं करिष्यामीत्युक्तवान्। एवमुक्त्वा महेन्द्रः तद् यक्षमभ्यद्रवत् यक्षसमीपं गतवान्। इन्द्रस्य आगमनानन्तरं तस्मात् इन्द्रात् तिरोदधे अन्तर्हितमभूत् तद्यक्षरूपमिति शेषः। यद्वा तस्मात् यस्मिन् प्रदेशे यक्षरूपं ब्रह्म पूर्वं दृश्यमानमासीत् तस्मात्प्रदेशात् तिरोदधे अन्तर्धानं चकार यक्षरूपमित्यर्थः। इन्द्रो हि देवराजः नास्य मानभङ्गः वह्निवाय्वोरिव भवतु इति विचार्यैव अन्तर्धानमाजगामेति भावः॥ ११॥

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमाना-मुमां हैमवतीं तां होवाच किमेतद्यक्षमिति॥ १२॥

इति केनोपनिषदि तृतीय खण्डः॥३॥

स इन्द्रः तस्मिन्नेव पूर्वंयक्षाधिष्ठिते एव आकाशे अवकाशप्रदेशे यक्षरूप क्व गतमित्यादि विमृशन् विस्मितमनाः सन् तस्थौ इति शेषत् ततः कियति काले प्रादुर्भूता स्त्री यक्षेण इन्द्रास्यानुग्रहार्थं प्रेषिता, दृष्ट्वा च ताम् स्त्रियम् आजगाम तत्समीपं गतवान् इन्द्रः यक्षस्य वृत्तं प्रष्टुकामः। आगत्य च बहुशोभमानामधिककान्तिमतीं हैमवतीं हिमवतो नगाधिराजस्य पुत्रीम् उमाम् उमाभिधानामुवाच सविनयं पृष्टवान्—ह निश्चये किमेतद् यक्षमिति, अत्र प्रदेशे पूर्वमस्माभिरपि दृश्यमानमिदानीञ्चान्तर्भूतमेतद् यक्षरूपं किम् देवेषु कतमत् इति। १२॥

इति केनोपनिषदि आनन्दभाष्ये तृतीयः खण्डः॥ ३॥

सन्तीति नैहाते जा. पञ्चदृश सनातन:।
अयता ऽऽज्ञानजीवाच्ये वेदवेद्यो महात्मिः॥

Scanned by CamScanner

अथ चतुर्थः खण्डः

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति ।। १ ।।

सा हैमवती उमा देवी ब्रह्मेति उवाच, यद् दृष्टं पूर्वं भवद्भिर्यक्षरूपम् तद् ब्रह्म स्वरूपतो गुणतश्च निरतिशयबृहत्त्वविशिष्टं ब्रह्मैव दृष्टम् इति उवाच प्रोक्तवती । ह निश्चयेन । हे इन्द्र यूयं देवाः ब्रह्मणः निरतिशयबृहत्त्ववतः सर्वान्तर्यामिनः परमपुरुषस्य वै निश्चयेन विजये महीयध्वम् अस्मदनुप्रविष्टः ब्रह्मकृत एवायं विजय इति कृत्वा महीयध्वम् महिमानं स्तुतिपूजादिलक्षणं प्राप्नुत, स्वकृतविजयनिमित्तं यत् पूर्वममहीयध्वं तदधुना त्यजत, स्वविजयनिमित्तं गर्वं मुञ्चतेति भावः । ततः ह निश्चयेन एव तस्मादुमावाक्यादेव ब्रह्म विदांचकार यदेतत् यक्षरूपमासीत् तद्ब्रह्मैव यक्षरूपेणाविर्भूतमासीदिति ज्ञातवान् इन्द्र इति शेषः ।।

तस्माद्वा एते देवा अतितरामिवान्यान्देवान् यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति ।। २ ।।

वै इति निश्चये तस्माद्वै तस्मादेव एते अग्निवायुमहेन्द्राः यतो हेतोः अग्निः वायुश्च यक्षरूपेण ब्रह्मणा सम्वादं चक्रतुः इन्द्रश्चोमावाक्यात् निश्चयं प्राप्तवान् तस्मात् हेतोरन्यान् वरुणकुबेरादीन् देवान् अतितरामिव अतिशयेन अतिक्रम्येव वर्तन्ते इति शेषः, वरुणादिदेवेभ्यः अग्निवायुमहेन्द्राः महिम्ना अधिका इत्यर्थः । इवेति निपातः एवार्थः, अनर्थो वात्र बोध्यः । के ते देवा इत्यत्राह यदग्निर्वायुरिन्द्रः यत् शब्दः प्रत्येकमन्वेति, यः अग्नि यो वायुः य इन्द्रः—इत्यर्थः छान्दसः

Scanned by CamScanner

यदित्यत्र लिङ्गव्यत्ययः। ते अग्नीन्द्रवायवः हि निश्चयेन एतत् यक्षरूपेणावस्थितं ब्रह्म नेदिष्ठम् अतिशयसमीपं पस्पृशुः तत्समीपं गता इत्यर्थः। यद्वा पस्पृशुः परामर्शं कृतवन्तः यद्वा पस्पृशुः स्पर्शं कृतवन्तः स च स्पर्शः अग्निवाय्वोः समीपगमनयक्षसम्वादरूपः, इन्द्रस्य तु समीपगमनोमासम्वादरूपः, अग्निवायुमहेन्द्राणामितरदेवापेक्षयाधिकमहिमत्वे कारणान्तमाह—ते अग्निवायुमहेन्द्राः हि यस्मात् एनत ब्रह्म प्रथमः छान्दसः लिङ्गव्यत्यासः प्रथमम् इतरदेवापेक्षया पूर्वमित्यर्थः विदाञ्चकार छान्दसः वचनव्यत्यासः विदाञ्चक्रुः ज्ञातवन्तः। तत्र इन्द्रस्य देवीवचनाद् ज्ञानम् अग्निवाय्वोस्तु इन्द्रवाक्यादिति विवेकः॥ २॥

तस्माद्वा इन्द्रोऽतितरामिवान्यान् देवान् स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत् प्रथमो विदाञ्चकार ब्रह्मेति॥ ३॥

अग्निवाय्वपेक्षयाऽपि इन्द्रस्याधिकमहत्व साधयति तस्मात यस्मात् यक्षरूपब्रह्मणः समीपदेशगामिषु अग्निवायुमहेन्द्रेषु इन्द्र एव प्रथममुमावाक्यात् प्रथम ब्रह्म ज्ञातवान् तस्माद्धेतोः वै निश्चयेन इन्द्रः अन्यात् स्वव्यतिरिक्तान् अग्निवायुवरुणादीन् अतितरामिव अतिशयेन अतिक्रम्य वर्तते ऐश्वर्यादिनेत्यर्थः। स इन्द्रः हि यस्मात एतत् ब्रह्म नेदिष्ठं पस्पर्श तत्समीपं गतवान् उमादेव्या सह ब्रह्मविषयकसम्वाद च कृतवान् अन्यमपि श्रेष्ठत्वे हेतुमाह—स इन्द्रः हि यस्मात् एतत् ब्रह्म प्रथमम् अग्निवायुभ्यां यक्षेण कृतसम्वादाभ्यामपि पूर्वम् उमावाक्याद् ब्रह्मेति विदांचकार यदेतद् दृष्टं यक्षस्वरूपमन्तर्हितं तद् ब्रह्मैवेति विदितवान्। सर्वतः प्रथमं ब्रह्मज्ञानं इन्द्रस्यैव जातमतः इन्द्रः सर्वेभ्यो देवेभ्यो गरीयान् ऐश्वर्यबलबुद्ध्यादिभिरिति भावः॥ ३॥

यस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इतीति न्यमीमिषदा३ इत्यधिदैवतम्॥ ४॥

तस्य इन्द्रादीनां पुरतः सहसाऽऽविर्भूय तिरोहितस्य ब्रह्मणः एष वक्ष्यमाणः आदेशः उमोपदेशः यत् यस्मात्। एतद् ब्रह्म। विद्युत्

इत्यत्र एकत्वे बहुवचनं छान्दसम्, आ शब्दश्चोपमार्थः तस्य विद्युत् इत्यनेनान्वयः तथा च विद्युदाव्यद्युतत् इत्यन्वयः विद्युदिव देवानामग्रे यक्षरूपेण ब्रह्म सहसाऽऽविर्भूतं सत् व्यद्युतत् यस्मात् तस्मात् विद्युत् इव दीप्तिमद् ब्रह्म समुपास्यमित्यर्थः। इति शब्दः आदेशस्वरूपसूचनार्थः इत्ययमादेश एव इत्यर्थः। इत् शब्दः समुच्चयार्थः तेन अपरोऽप्यादेशः समुच्चीयते स क इत्यत्राह न्यमीमिषत् आ, अत्रापि आ शब्दः उपमार्थः तस्य च विद्युत् इत्यनेनान्वयः तथा च विद्युदिव न्यमीमिषत ब्रह्म यथा विद्युत् सकृत् स्वस्वरूपं दर्शयित्वा क्षणादेव निलीना भवति तदा यथा क्वचित् चक्षुर्निमेषं कृतवान् इति प्रतीयते चक्षुषो निमीलने यथा किमपि न प्रकाशते तथा च विद्युतोऽन्तर्हितत्वे तत्प्रकाशाभावः तथा इन्द्रागमनसमये ब्रह्म तिरोहितमभूत् इति न्यमीमिषत् इत्यनेनोच्यते विद्युत् इव ब्रह्म सहसा तिरोहितमभवत् इत्यर्थः। अथ द्वितीयः आदेशः एवं विद्युदुपमानेन सहसाविर्भावतिरोभावशालि ब्रह्म द्योतनाद्द्योतनगुणवत्तयोपासनीयम्। इति अधिदैवतम्। देवतोपमानेन ब्रह्मणः उपासनीयादेशः कृतः देवता तु अत्र बाह्यभूतरूपा विद्युत् एव। न्यमीमिषत् इत्यत्र स्वार्थे णिच्। यद्वा विद्युत इति द्वितीया बहुवचनम्। त्वचचादि रूपार्थबोधकम् तथा च विद्युतः विद्युदादीन् तेजोधातून् आ शब्दोऽपक्षे समन्तादित्यर्थस्तेन आ समन्तात् एतत् ब्रह्म व्यद्युतत् अदीपयत् विद्युदाधीनं तेजः पदार्थानामपि प्रकाशकं एतद् ब्रह्म इत्येवं रूपेण उपास्यमिति भावः। आ न्यमिमिषत् समन्तात् विद्युदादीन् प्रकाशकानपि न्यमीलयत् ब्रह्म हि सर्वशक्तिमत्तया तेषां निमीलपनमपि सर्वतः कृतवत्, अतः तेजोधातूनां दीप्तिमतामपि निमीलनकारक ब्रह्मेत्येवं रूपेण उपास्यम्, इत्यादेशद्वयमत्रानुसन्धेयम् ॥ ४ ॥

एवमधिदैवतमादेश दर्शयित्वा अध्यात्ममपि आदेशं दर्शयति--

अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः ॥ ५ ॥

अथ देवतायां विद्युत्स्वरूपायामुपमानप्रदर्शनानन्तम् अध्यात्मम् आत्मनि इति अध्यात्मम् आत्मशब्दः शरीरवत् शरीरान्त इत्यर्थं तथा च शरीरे ब्रह्मण उपमानोपदेशः त्रि इति "अध्यात्मम्" इति वाक्यस्यार्थः। अनेन प्रेरितं मन एतत् गच्छति यत् तदिव अध्यात्ममुपदेश इत्यन्वयो योज्य अनेन प्रेरितं मनः मनोरूपमान्तरमिन्द्रियम्, एतद्ब्रह्म गच्छति विषयीकरोति यत् तदिव ब्रह्मणा प्रेरितस्य मनसः ब्रह्म प्रतिगमनमिव यक्षरूपं ब्रह्म आविर्भूतमित्युपमानोपदेशः यथा ब्रह्मणाप्रेरितं मनः ब्रह्मविषयीकरोति क्षणम् अनन्तरं च ततो निवर्तते न चिरकालपर्यन्तं ब्रह्म विषयीकर्तुं शक्नोति अति चञ्चलत्वात् तथैव किञ्चित्कालमेव देवानां पुरस्तात् प्रकटितमभूत् अतः ब्रह्म प्रति मनोगमनमाविर्भूतस्य यक्षरूपस्य ब्रह्मणः मनसश्च ब्रह्मगमनं शरीरे एव भवति अतः अयमुपमानोपदेशः अध्यात्ममित्युच्यते येन च ब्रह्मणा प्रेरितं मनः गच्छति तद् ब्रह्मोपास्यमिति भावः यद्वा अनेन ब्रह्मणा प्रेरितं मनः यत् ब्रह्म प्रति गच्छतीव वस्तुनो न गच्छति "यन्मनसा न मनुते येनाहुर्मनोन्मतमि"ति श्रुतेः तद् ब्रह्म उपास्यमित्यर्थं ननु मनः यदि वस्तुतो ब्रह्म न विषयीकुर्यात् कथमुपासकाः ब्रह्मध्यानं कुर्युरत आह—अनेनैव ब्रह्मणा अनिरुद्धस्वरूपेण अनुगृहीतं सत् मनः एतत् ब्रह्म उपस्मरति विषयीकरोति अभीक्ष्णं पौनःपुन्येन, भृशं वा, तन्मनः किं स्वरूपमित्यत्राह संकल्पः सकल्पयतीति सङ्कल्पम् सङ्कल्पजनक स्वरूपमित्यर्थः छान्दसत्वात् पुल्लिङ्गता। यद्वा नित्यपुल्लिङ्गस्वभाव एव सङ्कल्पशब्दः। एतेन यदनुग्रहे ब्रह्मस्मरणसमर्थं मनः अनुग्रहे च तदसमर्थं तद्ब्रह्मोपास्यमित्यादेशः व्याकृतो भवति। ब्रह्मातिरेकेऽविषये ब्रह्मानुग्रहाऽननुग्रहाभ्यामेव मनः स्मरणास्मरणकारि भवतीत्युपलक्षणतोऽवगन्तव्यम् ॥ ५ ॥

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यम् स य एतदेवं वेदाऽभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥ ६ ॥

तद् उक्तं ब्रह्म। ह प्रसिद्धौ। तद्वनं नाम तद्वनमिति नामतया

Scanned by CamScanner

प्रसिद्धमित्यर्थः तनोति व्याप्नोति चिदचिदात्मकं समस्तं जगत् इति तद् । तनु विस्तारे धातुः, अत् प्रत्ययः । वन्यते संभज्यते उपासकैरिति वनम् वन् सम्भक्तौ धातुः । अ प्रत्ययः । तच्च तद्वनं चेति तद्वनम् । कर्मधारय समासः । सर्वत्र व्याप्तत्वात् वननयोग्यत्वाच्च तद्वनं ब्रह्म भवति, अतस्तद्वनमित्युपासितव्यम् तदिति नाम्ना वनेति नाम्ना च उपासनीयम् ब्रह्म, सर्वान्तर्यामिनः संभजनीयस्य उपासनायोग्यत्वात । एवमुपासकस्य फलमैहिकं प्रदर्शयति, सः प्रसिद्धः योऽधिकारी एतद् ब्रह्म एवं तद्वनं नामेति रूपेण वेद उपास्ते एवं तद्वनं नामेत्येवंरूपेण उपासकं सर्वाणि भूतानि सर्वे प्राणिनः संवाञ्छन्ति इच्छन्ति सर्वेषाभीष्टो भवतीत्यर्थः ।। ६ ।।

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद् ब्राह्मीं वाव त उपनिषदमब्रूमेति ।।७।।

पूर्वोक्तं सर्वं श्रुत्वा शिष्यः पुनराचार्यं पृच्छति–भो आचार्य उपनिषद रहस्यं ब्रूहि उपदिश । तदा आचार्य उत्तरयति–उक्ता ते उपनिषत् । उपनिषत्प्रतिपाद्यं रहस्य मया तुभ्यं सर्वमुक्तम । तदेव दृढीकर्तुमाह आचार्यः ब्राह्मीं वाव ते उपनिषदमब्रूमेति । ते तुभ्यं ब्राह्मीं ब्रह्मविषयाम उपनिषदम् उपनिषत्स्वरूपम् अब्रूम उक्तवानस्मि । वाव एवार्थे । ब्रह्मेति होवाचेत्यादिना ब्रह्मणः प्रतिपादनं कृतमेव अत उपनिषत्प्रतिपाद्यं रहस्यं तुभ्यमुपदिष्टमेव नात्र किमप्यवशिष्टं पश्यामि यद्वदेवमिति भावः ।।७।।

तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम् ।।८।।

अधुना परमकृपालुः गुरुः शिष्याय ब्रह्मविद्यायाः कथ स्थितिर्भवति कथं च सा उत्पद्यते इति शिष्याय ब्रह्मविद्योपयोगितया उपदिशति–तस्यै ब्रह्मविद्यायै तपः कृच्छ्रचान्द्रायणादिकं शास्त्रपरामर्शश्च । दमः इन्द्रियनिग्रहः कर्म वर्णाश्रमोचितक्रियानुष्ठानम् अग्निहोत्रादिकर्माचर-

णमिति यावत् । इति एतत्त्रयं प्रतिष्ठा ब्रह्मविद्यायाः स्थितिहेतुः । वेदाः ऋगादयः सर्वाङ्गानि शिक्षा, कल्प, व्याकरण, ज्योतिष्छन्दोनिरुक्त-रूपाणि सर्वाणि षडपि अङ्गानि सत्यं यथार्थमपीडाजनकं वचनम् एतत्त्रयम् आयतनम् स्थानम् ब्रह्मविद्याया उत्पत्तौ कारणमित्यर्थः । वेदादिपरिशील-नेन ब्रह्मविद्योत्पद्यते उत्पन्ना च सा तपोदमविहितकर्मसेवयैव प्रतितिष्ठतीति त्रिकद्वयमेतत् विद्याकामुकैराश्रयणीयमिति भावः ॥८॥

यो वा एतामेवं वेदापहत्य पाप्मानमेमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥९॥

केनोपनिषदं जानानस्य फल वदति गुरु:-यो वा अधिकारी एतां ब्राह्मीमुपनिषदं एवम् स प्रतिष्ठां सायतनां ब्रह्मज्ञानहेतुभूतां वेद जानाति स उपनिषद्ज्ञानी पाप्मानमपहत्य सर्वाणि पापानि धर्माधर्मो अवधूय अनन्ते कालपरिच्छेदरहिते अपारे च ज्येये ज्यायसि अतिशयेन श्रेष्ठे सर्वतो महत्तरे वा स्वर्गे दु:खलेशासंस्पृष्टे सुखे लोके साकेताख्ये श्रीरामचन्द्रब्रह्मधाम्नि यद्वा लोक्यतेऽनेनेति लोकः तस्मिन् प्रकाशरूपे श्रीरामाख्ये परब्रह्मणि प्रतितिष्ठति प्रतिष्ठां प्राप्नोति स भगवद्धामतः पुनर्नागच्छतिन स पुनरावर्तते इति श्रुतेः "यद्गत्वा न निवर्त्तन्ते तद्धा-धामपरमं ममेति" स्मृतेश्च भगवद्धाम गतस्यापुनरावृत्यवगमात् इति भावः । प्रतितिष्ठति इति पदस्यावृत्तिः समाप्तिद्योतनार्था ॥९॥

इति केनोपनिषादानन्दभाष्यस्य चतुर्थः खण्डः ॥४॥

श्रीमद्भगवद्रामानन्दाचार्यकृतानन्दभाष्यभूषिता केनोपनिषत् समाप्ता ।

ॐ आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बल-मिन्द्रियाणि च । सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्या मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

Scanned by CamScanner

३—श्रीरामानन्दग्रन्थमालायास्तृतीयं पुष्पम् ।

भगवच्छ्रीरामानन्दाचार्यप्रणीतानन्दभाष्योपेता

ईशकेनकठप्रश्नमुण्डकमाण्डूक्य-तैत्तिरीयैतरेयोपनिषदः

संशोधकः—पण्डितसम्राट् स्वामी श्रीवैष्णवाचार्य
वेदान्तपीठाचार्य (**अहमदाबाद**)

गुरुपूर्णिमा
सन् १९६९ ई.

श्रीरामानन्दाब्द ६७०

सर्वेऽधिकाराः स्वायत्तीकृताः

मूल्य ६/००

Scanned by CamScanner

प्रकाशक :-श्रीरामानन्दवेदान्तप्रचारकसमिति अहमदाबाद

प्रथमावृत्ति-१००० प्रति

मूल्य-६/००

प्राप्तिस्थान-१-श्रीरामानन्दवेदान्तप्रचारकसमितिकार्यालय
अहमदाबाद

२-श्रीमोतीलाल बनारसीदास
चौक-वाराणसी

સમરીતિર્મહાતેજાઃ પરબ્રહ્મ સનાતનઃ।
જયત્યજ્ઞાનકીનાશો વેદવેદ્યો મહામતિઃ॥

ankurnagpal108@gmail.com

मुद्रक :—वैद्यराज स्वामी श्रीत्रिभुवनदासजी शास्त्री
श्रीरामानन्दप्रिन्टिंगप्रेस
कांकरियारोड-अहमदाबाद-२२

Scanned by CamScanner